## थाथघञ्क्ताजबित्रकाणाम् । (१४४/३८७८)

थ अथ घञ् क्त अच् अप् इत्र क इत्येवमन्तानामुत्तरपदानां गतिकारकोपपदात् परेषामन्तः उदात्तो भवति । सुनीथः । 'अवभृथः' (तै.सं. १.७.५.३) । 'हनिकुषिनीरमिकाशिभ्यः क्थन् (उ. १६७) नीतृथ अवे भृञः' (उ. १६८) इति च क्थन्प्रत्ययान्तावेतौ । [1]तत्र कृदुत्तरपदप्रकृतिस्वरत्वेनाद्युदात्तमुत्तरपदं स्यात् । अथ – 'आवसथः' (तै.ब्रा. १.१. १०.६) उपवसथः । 'उपसर्गे वसेः' (उ. ४०३) इति [2]अथन्प्रत्ययः । घञ् – प्रभेदः । काष्ठभेदः । रज्जुभेदः । क्त – दूरादागतः । आतपशुष्कः । विशुष्कः । अच् – प्रक्षयः । प्रजयः । 'क्षयो निवासे' (६.१.२०१/३६८९) 'जयः करणम्' (६.१.२०२/३६९०) इति चाद्युदात्तौ क्षयजयशब्दौ प्रयोजयतः । अप् – प्रलवः । [3]'प्रसवः' (तै.सं. १.१.४.२)। इत्र – प्रलवित्रम् । [4]प्रसवित्रम् । क – गोवृषः । खरीवृषः । गां वर्षति, खरीं वर्षति इति मूलविभुजादित्वात् (वा. २३२) कप्रत्ययः । प्रवृषः । [5]प्रहृषः । इगुपध (३.१.१३५/२८९७) इति कप्रत्ययः । 'वृषादीनां च' (६.१.२०३/३६९१) इति वृषशब्दः आद्युदात्तः । गतिकारकोपपदात् इत्येव, [6]सुस्तुतं भवता । कर्मप्रवचनीये अव्ययस्वरः एव भवति ॥

## सूपमानात् क्तः । (१४५/३८७९)

सु इत्येतस्मादुपमानाच्च परं क्तान्तमुत्तरपदमन्तोदात्तं भवति । 'सुकृतम्' (तै.सं. ४.७.२.२) । सुभुक्तम् । सुपीतम् । उपमानात् – [7]वृकावलुप्तम् । शशप्लुतम् । [8]सिंहविनर्दितम् । सुशब्दात् 'गतिरनन्तरः' (६.२.४९/ ३७८३) इति प्राप्ते उपमानादपि 'तृतीया कर्मणि' (६.२.४८/३७८२) इत्ययमपवादः । गतिकारकोपपदात् इत्येव, [9]सुस्तुतं भवता ॥

## सञ्ज्ञायामनाचितादीनाम् । (१४६/३८८०)

सञ्ज्ञायां विषये गतिकारकोपपदाद्[10] क्तान्तमुत्तरपदमन्तोदात्तं भवति आचितादीन् वर्जयित्वा । सम्भूतो रामायणः । [11]उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः । सम्भूतः इति [12]प्राप्त्यर्थात् भवतेः कर्मणि क्तः । 'गतिरनन्तरः' (६.२.४९/३७८३) इत्यत्र [13]हि कर्मणि इत्यनुवर्तते, तद्बाधनार्थं चेदम् । [14]धनुष्खाता नदी । कुद्दालखातं नगरम् । हस्तिमृदिता भूमिः । 'तृतीया कर्मणि' (६.२.४८/३७८२) इति प्राप्तिरिह बाध्यते । अनाचितादीनाम् इति किम् ? आचितम् । पर्याचितम् । आस्थापितम् । परिगृहीतम् । निरुक्तम् । प्रतिपन्नम् । [15]प्राश्लिष्टम् । उपहतम् । उपस्थितम् । 'संहितागवि' (ग. सू. १७१) । संहिताशब्दो यदा गोरन्यस्य सञ्ज्ञा तदा अन्तोदात्तो न भवति । यदा तु गोः सञ्ज्ञा तदा अन्तोदात्त एव ॥

## प्रवृद्धादीनां च । (१४७/३८८१)

[16]प्रवृद्धादीनां [17]च क्तान्तमुत्तरपदमन्तोदात्तं भवति । प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुक्ताः सक्तवः आकर्षे अवहितः । अवहितो भोगेषु । खट्वारूढः । 'कविशस्तः' (तै.सं. २.५.९.२) ।

यानादीनामत्र गणे पाठः [18]प्रायोवृत्तिप्रदर्शनार्थः, [19]न विषयनियमार्थः । यानादिभ्योऽन्यत्रापि तेषामन्तोदात्तत्वं भवत्येव । विषयनियमार्थं एवेत्येके । असञ्ज्ञार्थोऽयमारम्भः । आकृतिगणश्च प्रवृद्धादिर्द्रष्टव्यः । तेन 'पुनरुत्स्यूतं वासो देयम्' (मै.सं. १.७.२), 'पुनर्निष्कृतो रथः' (तै.सं. १.५.२.४) इत्येवमादि सिद्धं भवति ॥

---

1. तत्र नास्ति फ. 2. अथप्रत्ययः क, अथन् प्रत्ययान्तः ह. 3. प्रसवः नास्ति ग. 4. प्रसवित्रम् नास्ति फ. 5. प्रहृषः नास्ति फ. 6. अतिस्तुतं भवता इत्यधिकम् क, सुकृतं भवता इत्यधिकम् ह. 7. वृकै इव अवलुप्तम् इत्यधिकम् ह. 8. हंसनर्दितम् ड. 9. सुश्रुतं भवता क. 10. परे इत्यधिकम् फ. 11. उपहूतः ड. 12. प्राप्त्यर्थत्वात् ह. 13. हि नास्ति फ. 14. अनुध्याता ह. 15. उपश्लिष्टम् फ. 16. क्त इत्येव इत्यधिकम् ह. 17. समासानां इत्यधिकम् ह. 18. प्रायप्रयोग° ड.ग, प्रायप्रयोगः क. 19. न विषयनियमार्थः नास्ति फ.